संस्कृतवार्ता:

दिनाङ्क :-20.08.2025 प्रात: - 06:55

**<u>मुख्यवार्ता:</u>**

- एन्. डी. ए. दलपक्षतः उपराष्ट्रपतिपदस्य अभ्यर्थी सी. पी. राधाकृष्णन् इत्यसौ अद्य स्वीयनामांकनं प्रस्तोष्यति।
- प्रधानमन्त्री गतदिने नवदेहल्यां चीनदेशीयेन विदेशमन्त्रिणा वांग-यी इत्यमुना साकं उपवेशनं कृतवान्।
- विदेशमन्त्री डॉ. सुब्रह्मण्यम-जयशंकर: अद्य व्यापार-आर्थिक-वैज्ञानिक-प्रविधि-सांस्कृतिक-सहयोगे भारत-रूस-अन्तर-शासनिक-आयोग-सम्मेलनस्य सह-अध्यक्षतां कुर्यात्।

प्रधानमन्त्री -चीन विदेशमंत्री

प्रधानमन्त्री नरेन्द्रमोदी प्रोक्तवान् यत् भारत-चीनदेशयो: मिथ: स्थिरा: रचनात्मकाश्च सम्बन्धा: क्षेत्रीय-वैश्विकशान्त्यै समृद्धयै च महत्वपूर्णं योगदानं प्रदास्यन्ति। प्रधानमन्त्री भारत-चीन-सीम्नि शान्ति-सौहार्द-स्थपनायै अपि बलं दत्तवान्,एवमेव सीमविवादस्य निष्पक्ष-उचित-परस्परिकरूपेण स्वीकार्य समाधानाय भारतस्य प्रतिबद्धतामपि श्रीमोदी पुनरूदीरितवान्। प्रधानमन्त्री गतदिने नवदेहल्यां चीनदेशीयेन विदेशमन्त्रिणा वांग-यी इत्यमुना साकं उपवेशनानन्तरं एतान् विचारान् प्रकटितवान्। चीनदेशीय: विदेशमन्त्री वांगयी इत्यसौ शङ्घाई-सहयो-सङ्घटन-शिखर-सम्मेलने भागग्रहणाय प्रधानमन्त्रिणे नरेन्द्रमोदिने चीनदेशीयराष्ट्रपते: शी जिनपिंग इत्येतस्य संदेशं निमन्त्रणं च दत्तवान्।

मन्त्रिमण्डलम् :

राजस्थानस्य कोटा-बुन्दीति-नगरे ग्रीन्-फील्ड्-विमानस्थानकस्य विकासाय मन्त्रिपरिषत् अनुमोदनम् अददात्, यस्य अनुमानितव्ययः सार्धैकसहस्राधिक कोटिरूप्यकाणि अस्ति। परियोजनायां विंशति सहस्रवर्गमीटर्-परिमित क्षेत्रे विस्तृतस्य टर्मिनल्-भवनस्य निर्माणम् अन्तर्निहितमस्ति।

कोटा-नगरं राजस्थानस्य औद्योगिकराजधानीति मन्यते। कोटा-नगरं भारतस्य शैक्षणिक-प्रशिक्षण-केन्द्ररूपेणापि प्रसिद्धम् अस्ति। शैक्षणिक-औद्योगिक-क्षेत्रेषु अस्य प्रामुख्यमस्ति। अद्यापराह्णे नवदेहल्यां प्रसारमाध्यमैः सह वार्तालापं कुर्वन् सूचना-प्रसारण-मन्त्री अश्विनी-वैष्णवः अवदत् यत्, मन्त्रिमण्डलेन ओडिशा-राज्याय अपि प्रायशः सपादाष्टलक्ष- कोटिरूप्यकाणां व्ययेन षण्मार्गीय-मुद्रिकापथनिर्माणमपि अनुमोदितम्। अयं भुवनेश्वर-उपमार्गः कटक-भुवनेश्वर-खोर्धा-नगरेषु बृहत्-वाणिज्यिक-यातायातं अपसार्य ओडिशा-राज्याय पूर्वराज्येभ्यश्च महत्त्वपूर्णं लाभं प्रदास्यति।

एतेन भारपरिवहनस्य कार्यक्षमता वर्धिता भविष्यति इत्यपि मंत्रिणा स्वकीय वक्तव्ये प्रोक्तम्।

एन. डी. ए.-सभाः

एन्. डी. ए. दलपक्षतः उपराष्ट्रपतिपदस्य अभ्यर्थी सी. पी. राधाकृष्णन् इत्यसौ अद्य स्वीयनामांकनं प्रस्तोष्यति। एन्. डी. ए. दलपक्षतः सर्वे नेतारः नामांकन अवसरे समुपस्थिताः स्युः। एतत् पूर्वं सी. पी. राधाकृष्णन् इत्यस्य निर्वाचनाय सर्वाणि राजनैतिकदलानि, विपक्षिणश्च समाहूताः। गत दिने नवदेहल्यां एन्. डी. ए-संसदीय-पक्षस्य सभायां, श्रीमोदी श्री राधाकृष्णन्-वर्यं एन्. डी. ए-सांसदानां समक्षं परिचाययत्, तस्य दीर्घं सार्वजनिकजीवनं समुल्लेखयन् उक्तवान् यत् सः संसदः सदस्यत्वेन राज्यपालरूपेण च विभिन्न-क्षमताधायीनि कार्याणि अकरोदिति। सभायाः अनन्तरं प्रसारमाध्यमैः सह वार्तालापं कुर्वन् संसदीयकार्यमन्त्री किरेन रिजिजुः अवदत् यत्, उपराष्ट्रपतिनः निर्वाचने सर्वाणि राजनैतिकदलानि, तेषां सर्वेऽपि सांसदाश्च सर्वसम्मत्या राधाकृष्णन्-वर्यं समर्थयितुं प्रधानमन्त्री आवाहयदिति।

सः अवदत् यत् राधाकृष्णन् वर्यः कस्मादपि विवादात् दूरस्थो भूत्वा सरलं जीवनं यापयदिति, उपराष्ट्रपतिपदस्य निर्वाचनं सम्पूर्णदेशाय आनन्दस्य विषयो भविष्यतीति मन्त्री उक्तवान्। एतदतिरिच्य, काङ्ग्रेस्-पक्षस्य अध्यक्षः मल्लिकार्जुनखड़्गे वर्यः अद्य सर्वोच्चन्यायालयस्य पूर्वन्यायाधीशं बी. सुदर्शनरेड्डी इत्यमुं आई एन डी आई ए-समूहात् उपराष्ट्रपतिनिर्वाचनस्य अभ्यर्थी इति अघोषयत्।

प्रधानमन्त्री-बिहार

प्रधानमन्त्री नरेन्द्रमोदी मासस्यास्य द्वाविंशे दिनांके बिहारप्रदेशस्य गया-स्थले ऑटो-सिमरिया-परियोजनायाः शिलान्यासं विधास्यति। एतस्यां परियोजनायां गंगा-नद्यां प्रायशः द्विकिलोमीटरमितः नवः सेतु-सम्मिलितः, यश्च पटनाजनपदस्य मोकामा-बेगूसराय-स्थलयोःमध्ये सम्पर्कं प्रदास्यति। नवदेहल्यां वार्ताहरान् सम्बोधयन् भारतीय-राष्ट्रिय-राजमार्ग-प्राधिकरणाय सदस्यः अनिल-चौधरी विज्ञापितवान् यत् एषः नवः सेतुः प्राचीनस्य राजेन्द्रसेतुः इत्येतस्य समानान्तररूपेण निर्मितवान्, येन यात्रावधिः शंतकिलोमीटरमिता न्यूना स्यात्।

जयशंकर-रूस

विदेशमन्त्री डॉ. सुब्रह्मण्यम-जयशंकरः अद्य व्यापार-आर्थिक-वैज्ञानिक-प्रविधि-सांस्कृतिक-सहयोगे भारत-रूस-अन्तर-शासनिक-आयोग-सम्मेलनस्य सह-अध्यक्षतां कुर्यात्। एतत् षड्विशं सम्मेलनं भवेत्। डॉ. जयशंकरः मॉस्को इत्यत्र भारत-रूस-व्यापार-मञ्चस्य उपवेशनमपि सम्बोधयिष्यति।

शूटिंग

षोडश्यां एशियन्-शूटिंग-चैम्पियनशिप् इति प्रतिस्पर्धायां कजाकितानस्य श्यामकेंट इत्यत्र समायोज्यमानायाः प्रतिस्पर्धायाः द्वितीये दिने रश्मिकाः सहगलः स्वर्णपदकं विजितवती। एतत् पदकं भारतस्य तृतीयं वैयक्तिकं पीतं पदकं वर्तते।

।।इति वार्ताः।।